"हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत्। वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा"। (वनहरिद्रा) "आरण्यहरिद्राकन्दः कुष्ठवातास्रनाशनः"। (कर्पूरहरिद्रा) "दार्वीभेदाम्रगन्धा च सुरभिर्दारु दारु च। कर्पूरा पद्मपत्रा स्यात् सुरभिः सुरनायिका। आम्रगन्धिहरिद्रा या सा शीता वातला मता। पित्तहृन्मधुरा तिक्ता सर्वकण्डूविनाशिनी" भावप्र०।

**हरिद्रागणेश** पु० हरिद्रावर्णयुक्तो गणेशः। पीतवर्णे गणेशभेदे तन्त्रसारः। [स्त्रियां ङीष्।

**हरिद्राङ्ग** पुंस्त्री० हरिद्रेव अङ्गमस्य। हरितालखगे शब्दच०

**हरिद्राभ** पु० हरिद्रेव आभाति आ+भा–क। १पीतशाले (पियाशाल) २कर्चूरके ३पीतवर्णे च। ४तद्वति त्रि० अमरः।

**हरिद्राराग** त्रि० हरिद्राया इव रागः रञ्जनमनुरागः। अस्थिरानुरागे सौहृदे। "क्षणमात्रानुरागश्च हरिद्राराग उच्यते" हला०।

**हरिद्रु** पु० हरिः हरिद्वर्णो द्रुमादिद्वारा द्रुः। १तरुमात्रे हेमच०। २दारुहरिद्रायाञ्च अमरः। [तीर्थभेदे

**हरिद्वार** न० हरेस्तत्प्राप्तेः द्वारं सेवनात्। स्वनामख्याते

**हरिनामन्** न० हरेर्नाम तदाख्यानं वा। १विष्णुनामनि २तदाख्याने च हरेरिव नामास्य। ३मुद्गे पु० त्रिका०।

**हरिनेत्र** न० हरेर्नेत्रमिव। १श्वेतपद्मे राजनि०। ६त०। २विष्णोर्लोचने। हरेः सिंहस्येव नेत्रमस्य दीर्घत्वात्। ३पेचके पुंस्त्री० त्रिका० स्त्रियां ङीष्।

**हरिन्मणि** पु० हरिद्वर्णो मणिः। मरकते मणौ अमरः।

**हरिन्मुद्ग** पु० हरिद्वर्णो मुद्गः। शरदि पक्वे मुद्गे राजनि०।

**हरिप्रिय** न० हरेर्विष्णोः प्रियम्। १कालीयके चन्दने शब्दच०। २उशीरे राजनि०। ३कदम्बे पु० शब्दच०। ४पीतभृङ्गराजे ५विष्णुकन्दे ६करवीरे ७शङ्खे ८बन्धूके पु० राजनि०। ९शिवे १०बालिशे च पु०। ११लक्ष्म्यां स्त्री० १२तुलस्यां १३पृथिव्यां १४द्वादश्यां तिथौ च स्त्री। १५हरिवल्लभे त्रि०। [अमरः।

**हरिबालुक** न० हरेर्विष्णोः प्रियं बालुकाख्यम्। एलवालुके

**हरिभक्त** त्रि० हरौ विष्णौ भक्तः। १विष्णुभक्तियुते "सर्वजीवेषु यो विष्णुं भावयेत् समभावतः। हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः" ब्रह्मपु० २५ अ० उक्ते २सर्वत्रसमदृष्टिपूर्वकहरिसेवके पु०। [शब्दर०।

**हरिभद्र** न० हरिं भद्रयति सन्तर्पयति अच्। हरिबालुके

**हरिभुज्** पु० हरिं भेकं भुङ्क्ते भुज–क्विप्। सर्पे शब्दच०।

**हरिमन्थ** पु० मथ्यते मन्थः हरिर्मन्थ एकदेशो यस्य। १चणके राजनि० तस्य बहुमन्थनेऽपि पीतत्वामपायात्तथात्वम्। हरिं सर्पं मथ्नाति मन्थ–अण्। २गणिकारिकायाम् शब्दच०। ३देशभेदे पु० भरतः। [१चणके भरतः।

**हरिमन्थक** पु० हरिः पीतो मन्थ एकखण्डो यस्य कप्।

**हरिमन्थज** पु० हरिमन्थे देशभेदे जायते जन–ड। चणके अमरः। २कृष्णमुद्गे च हेमच०। [हेमच०।

**हरिय** पु० हरिं हरिवर्णं याति या–क। पीतवर्णघोटके

**हरिलोचन** पुंस्त्री० हरेरिव लोचनमस्य। १कर्कटे (काँकड़ा) त्रिका०। २पेचके।

**हरिवंश** पु० ६त०। १विष्णुवंशे हरेर्वंशो वर्ण्यत्वेनास्त्यत्र अच्। महाभारतान्तर्गते खिलरूपे व्यासकृते २ग्रन्थभेदे। तत्प्रतिपाद्यविषयाश्च हरिवं० २२५ अ० उक्ता यथा "हरिवंशेऽत्र वृत्तान्ताः कीर्त्त्यन्ते क्रमशोऽदिताः। तत्रादौ सर्गस्तु भूतसर्गस्ततः परः। पृथोर्वैण्यस्य चाख्यानं मनूनां कीर्त्तनं तथा। वैवस्वतकुलोत्पत्तिर्धुन्धुमारकथा तथा। गालवोत्पत्तिरिक्ष्वाकुवंशस्याप्यनुकीर्त्तनम्। पितृकल्पस्तथोत्पत्तिः सोमस्य च बुधस्य च। अमावसोरन्वयस्य कीर्त्तनं कीर्त्तिवर्द्धनम्। द्युतिप्रतिष्ठे शक्रस्य प्रभवः क्षत्रवृद्धिजः। दिवोदासप्रतिष्ठा च त्रिशङ्कोः क्षत्रियस्य च। ययातिचरितञ्चैव पुरुवंशस्य कीर्त्तनम्। कीर्त्तनं कृष्णसम्भूतेः स्यमन्तकमणेस्तथा। संक्षेपात् कीर्त्तिता विष्णोः प्रादुर्भावास्ततः परम्। तारकामययुद्धञ्च ब्रह्मलोकस्य वर्णनम्। योगनिद्रावस्थानं विष्णोर्वाक्यञ्च वेधसः। पृथ्वीशापश्च देवानामंशावतरणं तथा। ततो नारदवाक्यञ्च स्वप्नगर्भविधिस्तथा। आर्यास्तवः पुनः कृष्णसमुत्पत्तिः प्रपञ्चतः। गोव्रजे गमनं विष्णोः शकटस्य निवर्त्तनम्। पूतनाया वधो भङ्गो यमलार्जुनयोरपि। वृकसंदर्शनञ्चैव वृन्दावननिवेशनम्। प्रावृषो वर्णनञ्चापि यमुनाह्रददर्शनम्। कालियस्यापि दमनं धेनुकस्य वधस्तथा। प्रलम्बनिधनञ्चैव शरद्वर्णनमेव च। गिरियज्ञप्रवृत्तिश्च गोवर्द्धनविधारणम्। गोविन्दस्याभिषेकश्च गोपीसंक्रीडनं तथा। अन्धकस्य च वाक्यानि केशिनो निधनं तथा। अक्रूरागमनञ्चैव नागलोकस्य दर्शनम्। धनुर्भङ्गस्य कथनं कंसवाक्यन्ततः परम्। कुवलयापीडवधश्चाणूरान्ध्रवधस्तथा। कंसस्य निधनञ्चापि विलापः कंसयोषिताम्। उग्रसेना-